# shrI sUkta (Rigveda)

# શ્રીસૂક્ત (ઋગ્વેદ)

## Document Information

Text title : shrIsUkta

File name : s-sukta-accent.itx

Category : sUkta, veda, lakShmI, svara, rigveda, upanishhat

Location : doc_veda

Author : Rigveda

Transliterated by : sohum at ms.uky.edu (Avinash Sathaye), Anant Upadhyayula <uanant at ymail.com>

Proofread by : Avinash, Anant, Sunder Hattangadi NA

Description-comments : shrI sUkta extracted out of Khilas, and the book Mantrapushpam

Latest update : January 26, 1998, October 26, 2011

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 21, 2023

*sanskritdocuments.org*

shrI sUkta (Rigveda)

# શ્રીસૂક્ત (ઋગ્વેદ)

ૐ ॥ હિરણ્યવર્ણાં હરિણીં સુવર્ણરજતસ્રજામ્ ।
ચન્દ્રાં હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ॥ ૧॥

તાં મ આવહ જાતવેદો લક્ષ્મીમનપગામિનીમ્ ।
યસ્યાં હિરણ્યં વિન્દેયં ગામશ્વં પુરુષાનહમ્ ॥ ૨॥

અશ્વપૂર્વાં રથમધ્યાં હસ્તિનાદપ્રબોધિનીમ્ ।
શ્રિયં દેવીમુપહ્વયે શ્રીર્મા દેવીર્જુષતામ્ ॥ ૩॥

કાં સોસ્મિતાં હિરણ્યપ્રાકારામાર્દ્રાં જ્વલન્તીં તૃપ્તાં તર્પયન્તીમ્ ।
પદ્મે સ્થિતાં પદ્મવર્ણાં તામિહોપહ્વયે શ્રિયમ્ ॥ ૪॥

ચન્દ્રાં પ્રભાસાં યશસા જ્વલન્તીં શ્રિયં લોકે દેવજુષ્ટામુદારામ્ ।
તાં પદ્મિનીમીં શરણમહં પ્રપદ્યેઽલક્ષ્મીર્મે નશ્યતાં ત્વાં વૃણે ॥ ૫॥

આદિત્યવર્ણે તપસોઽધિજાતો વનસ્પતિસ્તવ વૃક્ષોઽથ બિલ્વઃ ।
તસ્ય ફલાનિ તપસા નુદન્તુ માયાન્તરાયાશ્ચ બાહ્યા અલક્ષ્મીઃ ॥ ૬॥

ઉપૈતુ માં દેવસખઃ કીર્તિશ્ચ મણિના સહ ।
પ્રાદુર્ભૂતોઽસ્મિ રાષ્ટ્રેઽસ્મિન્ કીર્તિમૃદ્ધિં દદાતુ મે ॥ ૭॥

ક્ષુત્પિપાસામલાં જ્યેષ્ઠામલક્ષ્મીં નાશયામ્યહમ્ ।
અભૂતિમસમૃદ્ધિં ચ સર્વાં નિર્ણુદ મે ગૃહાત્ ॥ ૮॥

ગંધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં કરીષિણીમ્ ।
ઈશ્વરીꣳ સર્વભૂતાનાં તામિહોપહ્વયે શ્રિયમ્ ॥ ૯॥

મનસઃ કામમાકૂતિં વાચઃ સત્યમશીમહિ ।
પશૂનાં રૂપમન્નસ્ય મયિ શ્રીઃ શ્રયતાં યશઃ ॥ ૧૦॥

કર્દમેન પ્રજાભૂતા મયિ સમ્ભવ કર્દમ ।
શ્રિયં વાસય મે કુલે માતરં પદ્મમાલિનીમ્ ॥ ૧૧॥

આપઃ સૃજન્તુ સ્નિગ્ધાનિ ચિક્લીત વસ મે ગૃહે ।
નિ ચ દેવીં માતરં શ્રિયં વાસય મે કુલે ॥ ૧૨॥

આર્દ્રાં પુષ્કરિણીં પુષ્ટિં પિઙ્ગલાં પદ્મમાલિનીમ્ ।
ચન્દ્રાં હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ॥ ૧૩॥

આર્દ્રાં યઃ કરિણીં યષ્ટિં સુવર્ણાં હેમમાલિનીમ્ ।
સૂર્યાં હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ॥ ૧૪॥

તાં મ આવહ જાતવેદો લક્ષ્મીમનપગામિનીમ્ ।
યસ્યાં હિરણ્યં પ્રભૂતં ગાવો દાસ્યોઽશ્વાન્વિન્દેયં પુરુષાનહમ્ ॥ ૧૫॥

યઃ શુચિઃ પ્રયતો ભૂત્વા જુહુયાદાજ્ય મન્વહમ્ ।
શ્રિયઃ પઞ્ચદશર્ચં ચ શ્રીકામઃ સતતં જપેત્ ॥ ૧૬॥

ફલશ્રુતિ

પદ્માનને પદ્મ ઊરુ પદ્માક્ષી પદ્મસમ્ભવે ।
ત્વં માં ભજસ્વ પદ્માક્ષી યેન સૌખ્યં લભામ્યહમ્ ॥

અશ્વદાયી ગોદાયી ધનદાયી મહાધને ।
ધનં મે જુષતાં દેવિ સર્વકામાંશ્ચ દેહિ મે ॥

પુત્રપૌત્ર ધનં ધાન્યં હસ્ત્યશ્વાદિગવે રથમ્ ।
પ્રજાનાં ભવસિ માતા આયુષ્મન્તં કરોતુ મામ્ ॥

ધનમગ્નિર્ધનં વાયુર્ધનં સૂર્યો ધનં વસુઃ ।
ધનમિન્દ્રો બૃહસ્પતિર્વરુણં ધનમશ્નુ તે ॥

વૈનતેય સોમં પિબ સોમં પિબતુ વૃત્રહા ।
સોમં ધનસ્ય સોમિનો મહ્યં દદાતુ સોમિનઃ ॥

ન ક્રોધો ન ચ માત્સર્યં ન લોભો નાશુભા મતિઃ ।
ભવન્તિ કૃતપુણ્યાનાં ભક્તાનાં શ્રીસૂક્તં જપેત્સદા ॥

વર્ષન્તુ તે વિભાવરિ દિવો અભ્રસ્ય વિદ્યુતઃ ।

રોહન્તુ સર્વબીજાન્યવ બ્રહ્મ દ્વિષો જહિ ॥

પદ્મપ્રિયે પદ્મિનિ પદ્મહસ્તે પદ્માલયે પદ્મદલાયતાક્ષિ ।
વિશ્વપ્રિયે વિષ્ણુ મનોઽનુકૂલે ત્વત્પાદપદ્મં મયિ સન્નિધત્સ્વ ॥

યા સા પદ્માસનસ્થા વિપુલકટિતટી પદ્મપત્રાયતાક્ષી ।
ગમ્ભીરા વર્તનાભિઃ સ્તનભર નમિતા શુભ્ર વસ્ત્રોત્તરીયા ।
લક્ષ્મીર્દિવ્યૈર્ગજેન્દ્રૈર્મણિગણ ખચિતૈસ્સ્નાપિતા હેમકુમ્ભૈઃ ।
નિત્યં સા પદ્મહસ્તા મમ વસતુ ગૃહે સર્વમાઙ્ગલ્યયુક્તા ॥

લક્ષ્મીં ક્ષીરસમુદ્ર રાજતનયાં શ્રીરંગધામેશ્વરીમ્ ।
દાસીભૂતસમસ્ત દેવ વનિતાં લોકૈક દીપાંકુરામ્ ।
શ્રીમન્મન્દકટાક્ષલબ્ધ વિભવ બ્રહ્મેન્દ્રગઙ્ગાધરામ્ ।
ત્વાં ત્રૈલોક્ય કુટુમ્બિનીં સરસિજાં વન્દે મુકુન્દપ્રિયામ્ ॥

સિદ્ધલક્ષ્મીર્મોક્ષલક્ષ્મીર્જયલક્ષ્મીસ્સરસ્વતી ।
શ્રીલક્ષ્મીર્વરલક્ષ્મીશ્ચ પ્રસન્ના મમ સર્વદા ॥

વરાંકુશૌ પાશમભીતિમુદ્રાં કરૈર્વહન્તીં કમલાસનસ્થામ્ ।
બાલાર્ક કોટિ પ્રતિભાં ત્રિણેત્રાં ભજેહમાદ્યાં જગદીશ્વરીં તામ્ ॥

સર્વમઙ્ગલમાઙ્ગલ્યે શિવે સર્વાર્થ સાધિકે ।
શરણ્યે ત્ર્યમ્બકે દેવિ નારાયણિ નમોઽસ્તુ તે ॥

સરસિજનિલયે સરોજહસ્તે ધવલતરાંશુક ગન્ધમાલ્યશોભે ।
ભગવતિ હરિવલ્લભે મનોજ્ઞે ત્રિભુવનભૂતિકરિપ્રસીદ મહ્યમ્ ॥

વિષ્ણુપત્નીં ક્ષમાં દેવીં માધવીં માધવપ્રિયામ્ ।
વિષ્ણોઃ પ્રિયસખીમ્ દેવીં નમામ્યચ્યુતવલ્લભામ્ ॥

મહાલક્ષ્મી ચ વિદ્મહે વિષ્ણુપત્ની ચ ધીમહી ।
તન્નો લક્ષ્મીઃ પ્રચોદયાત્ ॥

(આનન્દઃ કર્દમઃ શ્રીદશ્ચિક્લીત ઇતિ વિશ્રુતાઃ ।
ઋષયઃ શ્રિયઃ પુત્રાશ્ચ શ્રીર્દેવીર્દેવતા મતાઃ
(સ્વયમ્ શ્રીરેવ દેવતા ॥ ) variation)

(ચન્દ્રભાં લક્ષ્મીમીશાનામ્ સૂર્યભાં શ્રિયમીશ્વરીમ્ ।
ચન્દ્ર સૂર્યગ્નિ સર્વાભામ્ શ્રીમહાલક્ષ્મીમુપાસ્મહે ॥ variation)

શ્રીવર્ચસ્યમાયુષ્યમારોગ્યમાવિધાત્ પવમાનં મહીયતે ।
ધનં ધાન્યં પશું બહુપુત્રલાભં શતસંવત્સરં દીર્ઘમાયુઃ ॥

ઋણરોગાદિદારિદ્યપાપક્ષુદપમૃત્યવઃ ।
ભયશોકમનસ્તાપા નશ્યન્તુ મમ સર્વદા ॥

શ્રિયે જાત શ્રિય આનિર્યાય શ્રિયં વયો જનિતૃભ્યો દધાતુ ।
શ્રિયં વસાના અમૃતત્વમાયન્ ભજંતિ સદ્યઃ સવિતા વિદધ્યૂન્ ॥

શ્રિય એવૈનં તચ્છ્રિયામાદધાતિ । સન્તતમૃચા વષટ્કૃત્યં
સન્ધત્તં સન્ધીયતે પ્રજયા પશુભિઃ । ય એવં વેદ ।

ૐ મહાદેવ્યૈ ચ વિદ્મહે વિષ્ણુપત્ની ચ ધીમહિ ।
તન્નો લક્ષ્મીઃ પ્રચોદયાત્ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

શ્રીસૂક્તોપનિષદ્

Encoded and proofread by Avinash Sathaye, Shree,
Anant Upadhyayula, Sunder Hattangadi

*shrI sUkta (Rigveda)*

pdf was typeset on May 21, 2023

Please send corrections to *sanskrit@cheerful.com*